# पाठ्यक्रमः (Syllabus)

## राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

### विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः

**बहुविकल्पात्मकाः प्रश्नाः (MCQ) - 50** **पूर्णाङ्काः - 50**

| | | |
|---|---|---|
| **03.** | न्यायः | न्यायसिद्धान्तमुक्तावलिः -<br>प्रत्यक्षानुमानशब्दखण्डाः |

RLNSastry
16/3/23

# आदर्शप्रश्नपत्रम्

अत्र प्रश्नपत्रस्य प्रारूपमात्रं प्रदत्तम् । प्रवेशपरीक्षायां भवद्भ्यः प्रदत्तात् पाठ्यक्रमात् एव प्रश्नाः भवेयुः ।

## राष्ट्रियसंस्कृतविश्वविद्यालयःतिरुपतिः

## विद्यावारिधिः

**द्वितीयभागः -न्यायशास्त्रम्** **50 -अङ्काः**

51. को नाम न्यायः ?

A स्वार्थानुमानम् B परार्थानुमानम्

C पञ्चावयववाक्यम् D उभयम्

52. न्यायमते न्यायवयवाः कति ?

A त्रीणि B पञ्च

C दश D सप्त

53. प्राचीनमते का नाम पक्षता ?

A साध्यसंशयः B साध्यनिश्चयः

C साध्याभावनिश्चयः D सिद्ध्यभावः

54. न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्त्वं कस्य लक्षणम् ?

A प्रतिज्ञायाः B अवयवस्य

C हेतोः D न्यायस्य

55. सूत्रकारमते साध्यनिर्देशः लक्षणं भवति ?

A प्रतिज्ञायाः B उपनयस्य

C निगमनस्य D साध्यस्य

56. हेत्वाभाससामान्यनिरुपणे का सङ्गतिः ?

A प्रसङ्गः B एककार्यकारित्वम्

C अनुभयम् D उभयम्

57. परिकरो नाम किम् ?

A व्याप्तिः B पक्षधर्मता

C व्याप्तिपक्षधर्मते D परामर्शः

58. प्रयोजकत्वम् नाम किम् ?

A जनकजनकतावच्छेदकरुपम् B कारणत्वम्

C जनकत्वम् D करणत्वम्

RLNSastry 16/3/23

59. विशिष्टद्वयाघटित्वमस्मिंल्लक्षणे उक्तम् ?

A प्रथमे
B द्वितीये
C तृतीये
D न कुत्रापि

60. विशिष्टान्तराघटितत्वमित्यत्र अन्तरपदस्य अर्थः कः ?

A भिन्नार्थकम्
B अभिन्नार्थकम्
C नोभयात्मकम्
D स्वावच्छिन्नाविषयकप्रतीतिविषयात्मकम्

61. तात्पर्यज्ञानमत्र कारणम् ?

A शब्दबोधसमामान्ये
B नानार्थकपदबोधे
C लाक्षणिकबोधे
D न कुत्रापि

62. पदम् कतिविधम् ?

A द्विविधम्
B चतुर्विधम्
C पञ्चविधम्
D षड्विधम्

63. न्यायमते शक्तिर्नाम का ?

A परिभाषा
B आधुनिकपरिभाषा
C वाच्यवाचकभावरूपा
D ईश्वरसङ्केतः

64. वेदनित्यत्ववादिनः के ?

A मीमांसकाः
B नैयायिकाः
C बौद्धाः
D न कोऽपि

65. योग्यता नाम किम् ?

A लक्षणाबाधः
B लक्ष्याबाधः
C अर्थाबाधः
D आसत्त्यबाधः

66. स्मृतिलक्षणे मात्रपदानुपादानेऽतिव्याप्तिः कुत्र ?

A संस्कारे
B अनुमितौ
C प्रत्यभिज्ञायाम्
D शब्दे

67. एकयोकत्या पुष्पवन्तौ दिवाकरनिशाकरौ इत्यत्र उक्तिपदार्थः कः ?

A शक्तिः
B लक्षणा
C वचनम्
D गौणी

68. कार्यान्विते शक्तिरिति कस्मिन् मते ?

A न्यायमते
B मीमासकमते
C वेदान्तिनां मते
D सांख्यमते

RNSastry
16/3/23

69. घटोघटः इत्यत्र कीदृशः शब्दबोधः ?

A अभेदसंसर्गकबोधः B भेदबोधः

C अभेदप्रकारकबोधः D न बोधः

70. सिद्धान्ते राजपुरुषः इत्यत्र कीदृशः बोधः ?

A अभेदबोधः B न बोधः

C स्वत्वप्रकारकबेधः D स्वत्वसंसर्गकबोधः

71. संसर्गमर्यादा नाम का ?

A आकांक्षा B तात्पर्यम्

C योग्यता D न किमपि

72. प्रमायाः परतस्त्वं के स्वीकुर्वन्ति ?

A नैयायिकाः B मीमांसकाः

C वैयाकरणाः D सांख्याः

73. ख्यातिः कतिविधा ?

A त्रिविधा B पञ्चविधा

C बहुविधा D चतुर्विधा

74. न्यायमते प्रमाणानि कति ?

A पञ्च B चत्वारि

C त्रीणि D षट्

75. निःश्रेयसं न्यायमते किं रूपम् ?

A दुःखरूपम् B सुखरूपम्

C दुःखात्यन्ताभावरूपम् D चरमदुःखध्वंसरूपम्

**एवं क्रमेण पाठ्यक्रमानुगुणं 50 प्रश्नाः भवेयुः ।**

******

RNSastry
16/3/23